महाकविकालिदासविरचितं

रघुवंशम्

प्रो० हरि दामोदर वेलणकर, एम्. ए.

श्रीमदिन्दिराकान्तचरणान्तेवासिना

नारायण राम आचार्य 'काव्यतीर्थ' इत्यनेन

टीकाविशिष्टांश-टिप्पण्यादिभिरुपबृंह्य संशोधितम्

राष्ट्रिय-संस्कृत-संस्थानम्

मानितविश्वविद्यालयः

नवदेहली

पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम्

महाकविकालिदासविरचतं

रघुवंशम्

मल्लिनाथकृतसंजीविनीटीकया, वल्लभ-हेमाद्रि-दिनकरमिश्र-
चारित्रवर्धन-समुतिविजयादिटीकाविशिष्टांशैः, रघुवंश-
सार-पाठान्तर-विविधपरिशिष्टादिभिः

प्रो० हरि दामोदर वेलणकर, एम्. ए.

इत्येतेषां विद्वत्ताप्रचुरया भूमिकया च समुल्लसितम्

श्रीमदिन्दिराकान्तचरणान्तेवासिना

नारायण राम आचार्य 'काव्यतीर्थ' इत्यनेत

टीकाविशिष्टांश-टिप्पण्यादिभिरुपबृंह्य संशोधितम्

राष्ट्रिय-संस्कृत-संस्थानम्
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058

The firm will replace the copy/copies free of cost if any defect is found

प्रकाशकः
राष्ट्रिय-संस्कृत-संस्थानम्
(मानित विश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-110058

पुनर्मुद्रित संस्करण : 2011
मूल्य : 100.00

मुद्रक :
चौखम्भा ओरियन्टालिया
(प्राच्य-विद्या, आयुर्वेद एवं दुर्लभ ग्रन्थों के प्रकाशक)
बंग्लो रोड, 9-यू.बी., जवाहर नगर, (कमला नगर के पास)
दिल्ली-110007

पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्संवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्यः प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फुरति समाविष्करोति च। तत्र च वेदाः, शास्त्रीयं वाङ्मयम्, इतिहासः, पुराणानि, काव्यानीत्यनेकरचनाः विकासं गताः। ताश्च परम्परया संरक्षिताश्च। तत्ता आधुनिकशैल्या च संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविध प्रयासैः प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमाः परम्पराः संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाश-नार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकांश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविध ग्रन्थमालाः संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिक-संस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुनः प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। तत्र क्रमे एष ग्रन्थो विद्वल्लोकेन भृशं समादृतः **महाकविकालिदासविरचतं रघुवंशम् मल्लिनाथकृतसंजीविनीटीकया। नारायण राम आचार्य काव्यतीर्थ** इति नामकः **काव्यशास्त्रे ग्रन्थः** संस्थानस्य पुनर्मुद्रणयोजनान्तर्गततया प्राकाश्यन्नीयते। एषोऽपि ग्रन्थः सर्वैः यथापूर्वं समाद्रियेत इति विश्वसिमि। अस्मिन् पुनर्मुद्रणकर्मणि साहाय्यमाचरितवद्भ्यः सर्वेभ्यः संस्थानस्य अधिकारिभ्यः सम्यङ्मुद्रणार्थं च मुद्रकाय साधुवादान् वितरामि।

- राधावल्लभः त्रिपाठी

PREFACE

Kālidāsa's Raghuvaṁśa needs no introduction. This is an humble effort to present an authentic text of the same with the Sañjīvinī Commentary of Mallinātha and extracts from five others.

Mallinātha's commentary is not fully exhaustive and therefore I have supplimented it by short extracts from five other commentaries. In my opinion, it is a valuable addition and as such the present edition has become very usful even to an ordinary reader.

I earnestly thank Prof. H. D. Velankar, M. A., for his valuable Introduction. He has really obliged me and the readers by his labour of love, despite of his delicate health and heavy previous engagements. I equally thank Prof. D. D. Kosambi, M. A., for getting me a number of valuable Mss. and lovingly encouraging me throughout. My thanks are also due to Bhandarkar Oriental Institute, Poona, for the Mss. and Sjt. D. N. Marshall, M. A., Dip. Lib., the ever-obliging Librarian of the Bombay University, for lending me all sorts of books for reference.

Bombay
15th October 1948

N. R. Acharya

INTRODUCTION

The primary object of a Sanskrit Kāvya is the highest unadulterated delight which the poet as well as the hearer of a Kāvya may enjoy through the rise of sentiments. Moral advice is no doubt generally conveyed through a Kāvya, but in such a manner that the hearer is hardly conscious of it. The words and their meanings, both actual and suggested, employed by the poet are therefore expected to have the power to rouse, sustain and develop one or more of the moods of the human mind, which become transformed into pleasurable sentiments, when properly assisted by the efforts of a poet. The poet's words must have the capacity to stir the imagination of the hearer so as to raise him from his present surroundings and place him in the midst of quite a different set of circumstances, which are either totally unreal or belong to the past, but which are nevertheless conjured up into a temporary reality by the words of the poet. In the world of imagination, even things which are ordinarily unpleasant assume a pleasant form ; this is why we like to imagine the saddest and most dreadful things so long as they do not touch us or affect us physically. The poet knows this tendency of the human mind and tries to establish his influence on it by affording full scope to its power of imagination and feelings of all kinds including those of sadness.

गुणवदिति ॥ **दिलीपवंशजाः परिणामे** वार्धके **गुणवत्सुतेषु**[1] **रोपितश्रियः** स्थापितलक्ष्मीकाः **प्रयताश्च** सन्तः । **तरुवल्कान्येव वासांसि** तेषां **संयमिनां** यतीनां **पदवीं प्रपेदिरे** । यस्मात्तस्मादस्यापीदमुचितमित्यर्थः ॥ ११ ॥

तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः ।
पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः ॥ १२ ॥

तमिति ॥ [3]**अरण्यसमाश्रयोन्मुखं** वनवासोद्युक्तं **पितरं तं** रघुं **सुतो**ऽजः । **वेष्टनशोभिना**[4]उष्णीषमनोहरेण **शिरसा पादयोः प्रणिपत्य** । **आत्मनोऽपरित्यागमयाचत** । मां परित्यज्य न गन्तव्यमिति प्रार्थितवानित्यर्थः ॥ १२ ॥

रघुरश्रुमुखस्य तस्य तत्कृतवानीप्सितमात्मजप्रियः ।
न तु सर्प इव त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियम् ॥ १३ ॥

रघुरिति ॥ [5]**आत्मजप्रियः** पुत्रवत्सलो रघुः । अश्रूणि मुखे यस्य **तस्याश्रुमुखस्या**जस्य तदपरित्यागरूप**मीप्सित**मभिलषितं कृतवान् । किंतु **सर्पस्त्वचमिव व्यपवर्जितां** त्यक्तां **श्रियं** पुनर्न **प्रतिपेदे** न प्राप ॥ १३ ॥

स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुराद्बहिः ।
समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया ॥ १४ ॥

स इति ॥ **स रघुः किला**[6]**न्त्यमाश्रमं** प्रव्रज्यामा**श्रितः पुरा**न्नगराद्**बहिरावसथे** स्थाने **निवसन्नविकृतेन्द्रियः**[7] । जितेन्द्रियः सन्नित्यर्थः । अत **एव**

टिप्प०—1 गुणाः शौर्यधैर्यादय आभिगामिका वा ते विद्यन्ते येषां ते गुणवन्तस्तेषु सुतेषु–इति शिशु० ।

2 यमिनां मुनीनां पदवीं वानप्रस्थाश्रमं प्राप्ताः । अतस्तथा कृतवतो रघोरप्येतद्युक्तमिति भावः–इति दिनकर० ।

3 वनवासाभिमुखं तं रघुं चरणयोर्नमस्कृत्यात्मनोऽपरित्यागं प्रार्थयामास, मां विहाय वनं मा गच्छेत्यवादीदित्यर्थः–इति दिनकर० ।

4 तेन पट्टबन्धेन चाभिषेको लक्ष्यते । उष्णीषं वेष्टनं च पादयोः केशस्पर्शनं मा भूदिति वा; शिरसाऽवेष्टनशोभिना इत्यकारप्रश्लेषो वा । उष्णीषं त्यक्त्वा ननामेत्यर्थः–इति हेमाद्रिः । तस्य पादयोः केशमाल्यादिसंस्पर्शपरिहारोक्तिः–इति शिशु० ।

5 प्रियोऽभिमत आत्मजः पुत्रो यस्य स आत्मजप्रियः स रघुरश्रूणि मुखे यस्य तस्य बाष्पायमाणस्याजस्यापरित्यागरूपं वाञ्छितं चकार । न पुनर्व्यपवर्जितां परित्यक्तां लक्ष्मीं स्वीकृतवान्, यथा सर्पस्त्यक्तं कञ्चुकं नादत्ते–इति दिनकर० ।

6 अन्त्याश्रमो वानप्रस्थाश्रमः; 'ब्राह्मणस्यैव संन्यासः' इत्युक्तत्वात्–इति हेमाद्रिः ।

7 श्रियमगृहीत्वैव तत्रौदासीन्येन स्थित इत्यर्थः–इति हेमाद्रिः ॥ श्रियं परित्यज्यौदासीन्येन तत्र स्थित इत्यर्थः–इति शिशु० ॥ यतोऽसौ यतिस्ततो यमनियमाद्यष्टाङ्गयोगयुक्तः–इति वल्लभः ।

स्नुषयेव वध्वेव **पुत्रभोग्यया** न स्वभोग्यया । **श्रिया समुपास्यत** शुश्रूषितः । जितेन्द्रियस्य तस्य स्नुषयेव श्रियापि पुष्पफलोदकाहरणादिशुश्रूषाव्यतिरेकेण न किंचिदपेक्षितमासीदित्यर्थः ॥ अत्र यद्यपि 'ब्राह्मणाः प्रव्रजन्ति' इति श्रुतेः । 'आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्' (६।३८) इति मनुस्मरणात् । 'मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् । बाहुजातोरुजातानामयं धर्मो न विद्यते ॥' इति निषेधाच्च ब्राह्मणस्यैव प्रव्रज्या न क्षत्रियादेरित्याहुः । तथापि 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इत्यादिश्रुतेस्त्रैवर्णिकसाधारण्यात् । 'त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः' इति सूत्रकारवचनात् । 'ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद्गृहात्' (मनु. १०।११७) इति स्मरणात् । 'मुखजानामयं धर्मो वैष्णवं लिङ्गधारणम् । बाहुजातोरुजातानां त्रिदण्डं न विधीयते ॥' इति निषेधस्य त्रिदण्डविषयत्वदर्शनाच्च । कुत्रचिद्ब्राह्मणपदस्योपलक्षणमाचक्षाणाः केचित्त्रैवर्णिकाधिकारं प्रतिपेदिरे । तथा सति 'स किलाश्रममन्त्यमाश्रितः' (८।१४) इत्यत्रापि कविनाप्ययमेव पक्षो विवक्षित इति प्रतीमः । अन्यथा वानप्रस्थाश्रमतया व्याख्याते 'विदधे विधिमस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित्' (८।२५) इति वक्ष्यमाणेनानग्निसंस्कारेण विरोधः स्यात्; अग्निसंस्काररहितस्य वानप्रस्थस्यैवाभावात् इत्यलं प्रासङ्गिकेन ॥ १४ ॥

प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतनेश्वरम् ।
नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत् ॥ १५ ॥

प्रशमेति ॥ **प्रशमे स्थितः पूर्वपार्थिवो** रघुर्यस्य तत् । **अभ्युद्यतो**ऽभ्युदितो **नूतनेश्वरो**ऽजो यस्य तत् । प्रसिद्धं **कुलं निभृतेन्दुना**ऽस्तमयासन्नचन्द्रेणो**दितार्केण** प्रकटितसूर्येण च **नभसा तुलां** सादृश्यं **समारुरोह** प्राप । न च 'नभसा तुलाम्' इत्यत्र 'तुल्यार्थैः–' (पा. २।३।७२) इत्यादिना प्रतिषेधस्तृतीयायाः । तस्य सदृशवाचि'तुला'शब्दविषयत्वात् । 'कृष्णस्य तुला नास्ति' इति प्रयोगात्; अस्य च सादृश्यवाचित्वात् ॥ १५ ॥

यतिपार्थिवलिङ्गधारिणौ ददृशाते रघुराघवौ जनैः ।
[2]अपवर्गमहोदयार्थयोर्भुवमंशाविव धर्मयोर्गतौ ॥ १६ ॥

पाठा०–१ '°पूर्वपार्थिवः'. २ 'अपवर्गमहोदयार्थिनौ'; 'अपवृत्तिमहोदयार्थयोः'.

टिप्प०—1 वल्लभस्तु सहार्थोऽयं तुलाशब्दः; 'वृद्धो यूना' इति सहप्रयोगेऽपि ज्ञापितत्वात् इत्याह । 'तुल्यार्थैः' इत्यत्र तुल्यार्थस्य 'तुला' शब्दस्य योगे तृतीयानिषिद्धत्वादत्र 'तुला'शब्दस्य मानवाचकत्वान्न दोषपोषः । सदृशवाचके योगे निषेधः; 'सहवाचिनः प्रयोग इष्यत एव' इति भोजस्त्वाह ।